**संस्कृत-वार्ता:**

**दिनाङ्क : 04/02/2026**

**सायम् - 06:20**

**आदौ मुख्यवार्त्ता:**

- लोकसभायां विपक्षस्य विरोधप्रदर्शनस्य मध्ये केन्द्रमन्त्रिणा पीयूष गोयलेन भारत-अमेरिका-व्यापार-व्यवहारं प्रशंसितम्; उक्तम् च यत् व्यवहारः संवेदनशीलक्षेत्राणां विशेषतः कृषि, दुग्धक्षेत्रयोः च रक्षणं करिष्यति।
- विभिन्नेषु विषयेषु विपक्षस्य सदस्यानां कोलाहलेन लोकसभायाः कार्याचरणम् दिवस पर्यन्ताय स्थगितम्।
- सम्पूर्णे ब्रिक्स्-देशेषु विनिर्माण-उद्योगेभ्यः तथा एम्. एस्. एम्. ई. कृते एकीकृत-समर्थन-सेवाः प्रदातुं भारतं ब्रिक्स्-औद्योगिक-क्षमता-केन्द्रे सम्मिलितः अभवत्।
- ओलिम्पिक क्रिडिका ईशा सिंह इत्येषा दिल्ल्याः डा. कर्णी सिंह-शूटिङ्ग-रेञ्ज-इत्यत्र महिलानां व्यक्तिगत-दश मीटर्-एयर-पिस्टल-स्पर्धायाः निर्णायक-स्पर्धायां स्वर्णपदकं प्राप्तवती।
- आई. सी. सी. पुरुषाणां अण्डर्-19 क्रिकेट्-विश्वकप्-क्रीडायां जिम्बाब्वे-देशे भारत-अफगानिस्तान-देशयोः मध्ये उपान्त्यचक्रीय-क्रीडा प्रचलति।

**अथ वार्ता: विस्तरेण**

-

**गोयल:भारत-अमेरिका-सन्धि:**

केन्द्रीय-वाणिज्य-उद्योग-मन्त्री पियूष-गोयलः अवदत् यत् ऐतिहासिकः भारत-अमेरिका-व्यापार-सन्धिः द्वयोः देशयोः मध्ये सम्बन्धान् सुदृढं कर्तुं, सप्तचत्वारिंशदधिक द्विसहस्रतम वर्षपर्यन्तं राष्ट्रं विकसितभारतं कर्तुं भारतस्य यात्रां अग्रे नेतुं च महत्त्वपूर्णः पदाक्षेपो वर्त्तते। लोकसभायां प्रवदन् श्री गोयलः अवदत् यत्, अस्मिन् व्यापारसमन्वये, भारतं संवेदनशीलक्षेत्रेषु विशेषतः कृषि-दुग्ध-क्षेत्रयोः च स्वहितानां रक्षणे सफलतया समर्थः अभवत्। अस्मिन् वर्षे फरवरी-मासस्य द्वितीये दिनाङ्के प्रधानमन्त्रिणा नरेन्द्रमोदिना अमेरिकादेशस्य राष्ट्रपतिना डोनाल्ड् ट्रम्पेन सह दूरभाषद्वारा अनेकेषु द्वैपाक्षिक-वैश्विक-विषयेषु च चर्चा कृता। श्री गोयलः अवदत् यत् वार्तायाः अनन्तरं राष्ट्रपतिः ट्रम्पः अमेरिकादेशे भारतीय वस्तुनां निर्यातशुल्कं अष्टादशप्रतिशतात् न्यूनीकर्तुं घोषितवान्। सः अवदत् यत्, अन्येषु अनेकेषु देशेषु अमेरिका-देशेन आरोपितस्य शुल्कस्य अपेक्षया एषः दरः तुलनात्मकरूपेण न्यूनास्ति।

व्यापार-व्यवहारस्य लाभविषये श्रीगोयलः अवदत् यत्, संधिना लघु-मध्यम-उद्यमानां, एम. एस. एम. ई. इत्येतेषां, कुशल-कर्मचारिणां, उद्योगानां च कृते नूतनाः अवसराः उद्घाटिताः भविष्यन्ति। मन्त्रिणा सभायां सूचितं यत् प्रायः एकवर्षं यावत् बहुवारं चर्चायाः अनन्तरं, द्वैपाक्षिक-व्यापार-सन्धेः अनेकानि प्रमुखानि क्षेत्राणि चित्वा च अयं व्यवहारः सम्पन्नः अभवत् इति। मन्त्री अवदत् यत् अयं व्यवहारः विश्वस्य द्वयोः बृहत्तमयोः लोकतान्त्रिक- देशयोः मध्ये सुदृढः सम्बन्धः प्रतिबिम्बयतीति।

विपक्षीय-सदस्यानां कोलाहलस्य मध्ये श्रीगोयलः एतत् वक्तव्यं प्रदत्तवान्।

**लोकसभा-स्थगनम्**

विभिन्नेषु विषयेषु सभायां विपक्षीय दलानां कोलाहलेन लोकसभायाः कार्याचरणं दिवस-पर्यन्ताय स्थगितम्। तृतीयस्य स्थगनस्य अनन्तरं सायं पञ्चवादने यदा सभा पुनः समागता, तदा काङ्ग्रेस्, टि. एम्. सी. इत्यादीनि विपक्षदलानि सर्वकारस्य विरुद्धं कोलाहलं कृत्वा केन्द्रे आगतवन्तः । पीठासीन-अधिकारिणः आग्रहम् अपि व्यर्थं जातम्। अत्रान्तरे, राष्ट्रपतेः अभिभाषणस्य धन्यवाद-प्रस्तावस्य विषये राज्यसभायां चर्चा पुनः समारब्धा।

**ब्रिक्स-भारतम्**

सम्पूर्णे ब्रिक्स्-देशेषु विनिर्माण-उद्योगेभ्यः, सूक्ष्म-लघु-मध्यम-उद्यमाय च एकीकृत-समर्थन-सेवाः प्रदातुं भारतं ब्रिक्स्-औद्योगिक-सक्षमता-केन्द्रे सम्मिलितः। नवदिल्ल्यां उद्योगप्रवर्धनविभागेन आन्तरिकव्यापारविभागेन च आयोजिते कार्यक्रमे सूचितं यत् भारतं बी. सी. आई. सी. मध्ये सम्मिलितः अभवत्। वाणिज्य-उद्योग-मन्त्रालयः अवदत् यत् राष्ट्रिय-उत्पादकता-परिषद् (एन. पि. सि.) इतीदं ब्रिक्स्-औद्योगिक-क्षमतानां भारत-केन्द्रम् इति निर्दिष्टम् अस्ति इति। सः अवदत् यत् एन. पी. सी., बी. सी.आई. सी. इत्यनेन सह देशस्य सहभागितायाः नेतृत्वं करिष्यति तथा च क्षमता-निर्माणे, उत्पादकता-संवर्धने, उन्नत-विनिर्माण-पद्धतिं स्वीकर्तुं च योगदानं करिष्यति।

**राष्ट्रपतिःओडिशा**

ओडिशा-राज्यस्य षड्दिवसीय-यात्रावधौ राष्ट्रपतिः द्रौपदी मुर्मुः अद्य पवित्र- पुरी-नगरं सम्प्राप्तवती, यत्र सा भगवतः जगन्नाथ-मन्दिरे पुजार्चनां कृत्वा पिण्डदानं कृतवती। प्रातःकाले राष्ट्रपतिः महत्त्वपूर्ण-धार्मिक-महत्त्व-स्थले श्वेतगङ्गायां पिण्डदानानुष्ठानं कृतवती। ततः सा भगवान जगन्नाथमन्दिरं गत्वा प्रार्थनां पूजां च कृतवती। देवालययात्रायां राष्ट्रपतिना सह राज्यपालः डा. हरि बाबु कम्भम्पति, मुख्यमन्त्री मोहनचरण माझी च आस्ताम्। पुरी-नगरं गत्वा, राष्ट्रपतिः मयूरभञ्ज-नगरं प्रति प्रस्थितवती, यत्र सा ओडिशा-प्रवासस्य भागरूपेण निर्धारितकार्यक्रमेषु भागं ग्रहीष्यति।

### ऋतु-विभागः

भारत-ऋतु-विभागेन, आई. एम. डी. इत्यनेन श्वः दिल्ली, पञ्जाब, हरियाणा, चण्डीगढ, उत्तराखण्ड, बिहार इत्येतेषु प्रदेशेषु सघन-निहराच्छादनस्य पूर्वानुमानं प्रकटितम्। ऋतु-विभागेन अद्य हिमाचलप्रदेशे, मध्यप्रदेशे, पूर्वी-उत्तरप्रदेशे, पश्चिमी-उत्तरप्रदेशे, उप-हिमालयी-पश्चिमवङ्ग-प्रदेशे, सिक्किम-प्रदेशे च एतादृशेः स्थितेः संभावना प्रकटिता अस्ति। अगामि दिनद्वयोः जम्मू-कश्मीर, लद्दाख, गिल्गिट-बाल्टिस्तान, मुज़फ़्फ़राबाद, हिमाचलप्रदेश, उत्तराखण्ड इत्येतेषु प्रदेशेषु विद्युद्योतनेन सह हिमपातस्य सम्भावना अस्ति।

### विराम

**संस्कृतवार्तायाः संस्करणमिदम् इदानीम् आकाशवाणीतः प्रसार्यते। सममेव अयं कार्यक्रमः आकाशवाण्याः अन्तर्जालपत्रे www.newsonair.gov.in इत्यत्र, अथ newsonair चलदूरभाषीय- तन्त्रांशे अपि उपलब्धो भविष्यति।**

### राय-नक्सल-मुक्त-भारतम्

गृहराज्यमन्त्री नित्यानन्द रायः अद्य पुनः उक्तवान् यत् सर्वकारः षड्विंशत्यधिक द्विसहस्रतम वर्षस्य मार्च-मासपर्यन्तं भारतं नक्सल-मुक्तं कर्तुं प्रतिबद्धः अस्ति तथा च अस्मिन् विषये प्रधानमन्त्रिण: नरेन्द्रमोदिनः नेतृत्वे अनेके उपायाः कृताः सन्ति। राज्यसभायां प्रश्नकाले प्रत्युत्तरे सः अवदत् यत् एन. डी. ए-सर्वकारस्य नक्सलवादं विरुद्ध शून्य-सहिष्णुता-नीतिः अस्ति इति। सः अवदत् यत् नक्सलवादस्य उन्मूलनाय षट् प्रायोजितयोजनानां कार्यान्वयनाय दश सहस्रकोटिरूप्यकाणां प्रयोगः अभवत्। समाह्वानानां निराकरणे प्रारम्भिकसर्वकारस्य विफलतायाः प्रश्ने श्रीरायः अवदत् यत् चतुर्दशाधिक द्विसहस्रतमवर्षात् प्राक् केन्द्रसर्वकारस्य अनुसारं दायित्वं केन्द्रसर्वकारस्य न, अपितु राज्य सर्वकारस्य आसीदिति।

### मलेशिया-प्रधानमन्त्री

मलेशिया-देशस्य प्रधानमन्त्रिणः अन्वर इब्राहिम इत्यस्य आमन्त्रणे प्रधानमन्त्री नरेन्द्रमोदी फरवरी सप्त-अष्ट-दिनांकयोः मलेशिया-देशस्य आधिकारिकयात्रां भविष्यति। चतुर्विंशत्यधिक द्विसहस्रतम वर्षस्य अगस्त-मासस्य भारत-मलेशिया-द्वैपाक्षिक-सम्बन्धस्य 'व्यापक-सामरिक-सहभागित्वस्य उन्नतेः अनन्तरं प्रथमम् अपि च मलेशिया-देशस्य प्रधानमन्त्रिणः मोदिनः एतत् तृतीयं भ्रमणम् भविष्यति। विदेशमन्त्रालयः अवदत् यत् यात्रायाः समये प्रधानमन्त्री मलेशिया-देशस्य समकक्षीयेन सह द्वैपाक्षिकं चर्चां करिष्यतीति।

### ईशा-स्वर्णपदकम्

ओलिम्पिक क्रीडिका ईशा सिंह इत्येषा एशियन् राइफ़ल् एण्ड् पिस्टल चाम्पियन्शिप् स्पर्धायाः प्रथमे दिने दिल्ल्याः डा. कर्णी सिंह शूटिङ्ग रेञ्ज इत्यत्र महिलानां व्यक्तिगत दशमीटर परीमिते एयर पिस्टल-स्पर्धायाः निर्णायक-स्पर्धायां स्वर्णपदकं प्राप्तवती।

**अण्डर्-19 क्रिके**

आई. सी. सी. पुरुषाणां अण्डर्-19 क्रिकेट्-विश्वचषक-क्रीडायां जिम्बाब्वे-देशे भारत-अफगानिस्तान्-देशयोः मध्ये उपान्त्यचक्रीय-क्रीडा प्रचलति। अफगानिस्तान दलेन दशाधिक-त्रिशत धावनाङ्कानां लक्ष्यं भारतस्य सम्मुखे स्थापितम्।

**॥ इति वार्ता: ॥**

-